स्मृतिरोधिना मम वियुक्तमिदं तमसा मनः। मनसिजेन सखे! प्रहरिष्यता धनुषि चूतशरश्च निवेशितः”। अत्र कण्वसुता शकुन्तलाप्रणयस्मृतिविरोधिना अज्ञानेन मम मनो वियुक्तमित्यदृष्टकृतं स्मरणम् न सदृशवस्तुदर्शनजन्यम्। चिन्ताजन्यम् यथा “पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्य्यासं यातो घनविरलभावः क्षितिरुहाम्। अहो दृष्टं कालादपरमिव जातं वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं जनयति”। अत्र प्रत्यक्षेषु स्रोतस्तरुवनादिषु चिन्ताजन्यत्वात् चिन्तोद्भूतं स्मरणम् आदिग्रहणात् परप्रयत्नादपि यथा “दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन। स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता”। अत्र परप्रयत्नजन्यत्वात्तथात्वम्। प्रत्यभिज्ञानं यथा। “स्पर्शः पुरा परिचितो नियतं स एष संजीवनश्च मनसः परिमोहनश्च”। अत्र य एव पूर्व्वानुभूतः स एवैषः इति प्रत्यभिज्ञा स्मरणम्। स्वप्नरूपं यथा। नागानन्दे “अद्य खलु स्वप्ने जानामि सैव प्रियतमा अत्र चन्दनलतागृहे चन्द्रकान्तमणिशिलायामुपविष्टा प्रणयकुपिता किमपि मामुपालभमानेव रुदती मया दृष्टा” जीमूतवाहनेन विदूषकसमीपे स्वप्नस्य वर्णनम्। स्वप्नप्रत्यभिज्ञयोः पूर्वानुभूतसंस्कारजातत्वात् स्मरणत्वम्।

१२१ स्वभावोक्तिः “नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती। स्वभावोक्तिश्च जातिश्चेत्याख्या सालङ्कृतिर्मता” दण्डी “तुण्डैराताम्रकुटिलैः पक्षैर्हरितकोमलैः। त्रिवर्णराजिभिः कण्ठैरेते मञ्जुगिरः शुकाः”। “कलक्वणितगर्भेण कण्ठेनाघूर्णितेक्षणः। पारावतः परिभ्रम्य रिरंसुश्चुम्बति प्रियाम्”। “बध्नन्नङ्गेषु रोमाञ्चं कुर्व्वन् मनसि निर्वृतिम्। नेत्रे चामीलयन्नेष प्रियास्पर्शः प्रवर्त्तते”। “कण्ठेकालः करस्थेन कपालेनेन्दुशेखरः। जटाभिः स्निग्धताम्राभिराविरासीद्वृषध्वजः”। “जातिक्रियागुणद्रव्यस्वभावाख्यानमीदृशम्। शास्त्रेष्वस्यैव साम्राज्यं काव्येष्वप्येतदीप्सितम्”। इयं जातिरपि।

१२२ हेतुः “हेतोर्हेतुमता सार्द्धं वर्णनं हेतुरुच्यते १। हेतुहेतुमतोरैक्यवर्णनं हेतुरुच्यते२”। “च० असावुदेति शीतांशुर्मानच्छेदेन सुभ्रुवाम्”१। “लक्ष्मीविलासोभवतः कटाक्षवेक्षणं प्रभो!”२।

१२२ हेत्वपह्नुतिः “युक्त्या स एव पूर्णश्चेदुच्यते हेत्वपह्नुतिः।” च० स एव धर्म्मनिह्नव एव। “नेन्दुस्तीव्रो न निश्यर्कः सिन्धोरौर्व्वोऽयमुत्थितः”। अन्येऽलङ्कारा एष्वेवान्तर्भूताः। देहभूषणानि च शिरस्त्रादीनि तानि च प्राधान्यादष्टौ “शिरस्त्रं मुकुटं हारः कुण्डलं चाङ्गदं तथा। कङ्कणं वलयञ्चैव मेखलेत्यष्टधा वरम्”। वरं प्रधानं तेन अप्रधानानि पादकटकादीन्यपि। तत्र भूषणद्रव्याणि “पद्मरागश्च वज्रञ्च गोमेदो विजयस्तथा। मुक्ता वैदूर्य्यनीलानि तथा मरकतादयः। सुवर्णेनापि घटना सर्वेषामुपदिश्यते। प्रधानभूषणेष्वेवमप्रधाने न निश्चयः। प्रधानभूषणं प्रायः शिरसोऽग्रे विधीयते”। भृगु० “सुखदा मणयः शुद्धा दुःखदा दोषशालिनः” युक्तिक० नवालङ्कारधारणे विहितनक्षत्रादि यथा “रेवत्यश्विधनिष्ठासु हस्तादिष्वपि पञ्चसु। गुरुशुक्रबुधाहेषु वस्त्रालङ्कारधारणम्” ज्योति० अत्रापवादः “उद्वाहे राजसम्माने ब्राह्मणानाञ्च सम्मतौ। अनिष्टेष्वपि निर्द्दिष्टं वस्त्रालङ्कारधारणम्”। ६नायकयोरङ्गजादिभावभेदेषु ते च यथा “यौवने सत्वजास्तासामष्टाविंशतिसंख्यकाः। अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः। शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता। औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः। लीला विलासोविच्छित्तिर्व्विव्वोकः किलकिञ्चितम्। मोट्टायितं कुट्टमितं विभ्रमोललितं मदः। विकृतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम्। हसितं चकितं केलिरित्यष्टादशसंख्यकाः। स्वभावजाश्च भावाद्यादश पुंसां भवन्त्यपि”। पूर्व्वे भावादयो धैर्य्यान्ता दश नायकानामपि सम्भवन्ति किन्तु सर्व्वेऽप्यमी नायिकाश्रिता एव विच्छित्ति विशेषं पुष्णन्ति” सा० द० उक्ताः। एषां लक्षणानि तत्तच्छब्दे वक्ष्यन्ते। ७अन्तगुरौ चतुष्कले”॥ऽइत्याकारे गणभेदे च॥ [समर्थे धनादौ।

**अलङ्कुमारि** त्रि० अलंकुमार्य्यै तद्भरणाय। कुमारीभरण-

**अलङ्कृत** त्रि० अलम्+कृ—कर्म्मणि क्त। भूषिते मण्डिते। “अदोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम्” सा० द० “सत्कृतालङ्कृतां कन्यां योददाति स कूकुदः” इत्यमरः।

**अलङ्कृति** स्त्री अलम्+कृ—भावे क्तिन्। १भूषणे करणे क्तिन्। २भूषणसाधने अलङ्कारशास्त्रोक्ते ३उपमाद्यलङ्कारे च “तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनःक्वापि” काव्य० प्र० “यो विद्वान् मन्यते काव्यं शब्दार्थावनलङ्कृती। असौ न मन्यते कस्मादनुष्णमनलङ्कृती” चन्द्रा०।

**अलङ्क्रिया** स्त्री अलम्+कृ—भावे श। भूषायाम्।

**अलङ्गामिन्** त्रि० अलं पर्य्याप्तं गच्छति णिनि स्त्रियां ङीप्। गमनसमर्थे रिपुं प्रति गन्तरि।

**अलङ्घनीय** त्रि० न लङ्घनीयः। अनतिक्रमणीये। “लङ्घनमितरा नाद्रौ नेदं सिन्धावगाधता। अलङ्घनीयताहेतुरुभयं तन्मनस्विनि” माघः।